# Shri Vasavi Kanyaka Parameshwari Sahasranama Stotram

# શ્રીવાસવીકન્યકાપરમેશ્વરીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Vasavi Kanyaka Parameshvari Sahasranama Stotra

File name : vAsavIkanyakAparameshvarIsahasranAmastotram.itx

Category : devii, sahasranAma, devI

Location : doc_devii

Author : Bala Umamaheshwari from nAmAvalI

Transliterated by : NA

Proofread by : Bala Umamaheshwari

Description/comments : See corresponding nAmAvalI

Latest update : May 26, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીવાસવીકન્યકાપરમેશ્વરીસહસ્રનામસ્તોત્રમ્

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥

વક્રતુણ્ડ મહાકાય સૂર્યકોટિ સમપ્રભ ।
નિર્વિઘ્નં કુરુ મે દેવ સર્વકાર્યેષુ સર્વદા ॥

ન્યાસઃ ।
અસ્ય શ્રીવાસવીકન્યકાપરમેશ્વરીસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય,
સમાધિ ઋષિઃ, શ્રીવાસવીકન્યકાપરમેશ્વરી દેવતા,
અનુષ્ટુપ્છન્દઃ, વં બીજમ્, સ્વાહા શક્તિઃ, સૌભાગ્યમિતિ કીલકમ્,
શ્રીવાસવીકન્યકાપરમેશ્વરી પ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

ધ્યાનમ્ ।
વન્દે સર્વસુમઙ્ગલરૂપિણીં વન્દે સૌભાગ્યદાયિનીમ્ ।
વન્દે કરુણામયસુન્દરીં વન્દે કન્યકાપરમેશ્વરીમ્ ॥

વન્દે ભક્તરક્ષણકારિણીં વાસવીં વન્દે શ્રીમન્ત્રપુરવાસિનીમ્ ।
વન્દે નિત્યાનન્દસ્વરૂપિણીં વન્દે પેનુકોણ્ડાપુરવાસિનીમ્ ॥

અથ સહસ્રનામસ્તોત્રમ્ ।
ૐ શ્રીકન્યકા કન્યકામ્બા કન્યકાપરમેશ્વરી ।
કન્યકાવાસવીદેવી માતા વાસવકન્યકા ॥ ૧॥

મણિદ્વીપાદિનેત્રા ચ મઙ્ગલા મઙ્ગલપ્રદા ।
ગૌતમીતીરભૂમિસ્થા મહાગિરિનિવાસિની ॥ ૨॥

સર્વમન્ત્રાત્મિકા ચૈવ સર્વયન્ત્રાદિનાયિકા ।
સર્વતન્ત્રમયી ભદ્રા સર્વમન્ત્રાર્થરૂપિણી ॥ ૩॥

સર્વજ્ઞા સર્વગા સર્વા બ્રહ્મવિષ્ણુશિવાર્ચિતા ।
નવ્યા દિવ્યા ચ સેવ્યા ચ ભવ્યા સવ્યા સતવ્યયા ॥ ૪॥

ચિત્રઘણ્ટમદચ્છેદ્રી ચિત્રલીલામયી શુભા ।
વેદાતીતા વરાશ્રીદા વિશાલાક્ષી શુભપ્રદા ॥ ૫॥

શુભશ્રેષ્ઠિસુતા ઈષા વિશ્વા વિશ્વમ્ભરાવની ।
કન્યા વિશ્વમયી પુણ્યાऽગણ્યા ચ રૂપસુન્દરી ॥ ૬॥

સગુણા નિર્ગુણા ચૈવ નિર્દ્વન્દ્વા નિર્મલાऽનઘા ।
સત્યા સત્યસ્વરૂપા ચ સત્યા સત્યસ્વરૂપિણી ॥ ૭॥

ચરાચરમયી ચૈવ યોગનિદ્રા સુયોગિની ।
નિત્યધર્મા નિષ્કલઙ્કા નિત્યધર્મપરાયણા ॥ ૮॥

કુસુમશ્રેષ્ઠિપુત્રી ચ કુસુમાલયભૂષણા ।
કુસુમામ્બા કુમારી ચ વિરૂપાક્ષસહોદરી ॥ ૯॥

કર્મમયી કર્મહન્ત્રી કર્મબન્ધવિમોચની ।
શર્મદા બલદા નિષ્ઠા નિર્મલા નિસ્તુલપ્રભા ॥ ૧૦॥

ઇન્દીવરસમાનાક્ષી ઇન્દ્રિયાણાં વશઙ્કરી ।
કૃપાસિન્દુઃ કૃપાવાર્તા મણિનૂપુરમણ્ડિતા ॥ ૧૧॥

ત્રિમૂર્તિપદવીધાત્રી જગદ્રક્ષણકારિણી ।
સર્વભદ્રસ્વરૂપા ચ સર્વભદ્રપ્રદાયિની ॥ ૧૨॥

મણિકાઞ્ચનમઞ્જીરા હ્યરુણાઙ્ગ્રિસરોરુહા ।
શૂન્યમધ્યા સર્વમાન્યા ધન્યાऽનન્યા સમાદ્ભુતા ॥ ૧૩॥

વિષ્ણુવર્દનસમ્મોહકારિણી પાપહારિણી ।
સર્વસમ્પત્કરી સર્વરોગશોકનિવારિણી ॥ ૧૪॥

આત્મગૌરવસૌજન્યબોધિની માનદાયિની ।
માનરક્ષાકરીમાતા ભુક્તિમુક્તિપ્રદાયિની ॥ ૧૫॥

શિવપ્રદા નિસ્સમા ચ નિરતિકા હ્યનુત્તમા ।
યોગમાયા મહામાયા મહાશક્તિસ્વરૂપિણી ॥ ૧૬॥

અરિવર્ગાપહારિણી ભાનુકોટિસમપ્રભા ।
મલ્લીચમ્પકગન્ધાઢ્યા રત્નકાઞ્ચનભૂષિતા ॥ ૧૭॥

ચન્દ્રચૂડા શિવમયી ચન્દ્રબિમ્બસમાનના ।

રાગરૂપકપાશાઢ્યા મૃગનાભિવિશેષકા ॥ ૧૮॥

અગ્નિપૂજ્યા ચતુર્ભુજા નાસાચામ્પેયપુષ્પકા ।
નાસામૌક્તિકસુજ્વાલા કુરુવિન્દકપોલકા ॥ ૧૯॥

ઇન્દુરોચિસ્મિતા વીણા વીણાસ્વરનિવાસિની ।
અગ્નિશુદ્ધા સુકાઞ્ચિતા ગૂઢગુલ્ફા જગન્મયી ॥ ૨૦॥

મણિસિમ્હાસનસ્થિતા કરુણામયસુન્દરી ।
અપ્રમેયા સ્વપ્રકાશા શિષ્ટેષ્ટા શિષ્ટપૂજિતા ॥ ૨૧॥

ચિચ્છક્તિઃ ચેતનાકારા મનોવાચામગોચરા ।
ચતુર્દશવિદ્યારૂપા ચતુર્દશકલામયી ॥ ૨૨॥

મહાચતુષ્ષષ્ટિકોટિયોગિનીગણસેવિતા ।
ચિન્મયી પરમાનન્દા વિજ્ઞાનઘનરૂપિણી ॥ ૨૩॥

ધ્યાનરૂપા ધ્યેયરૂપા ધર્માધર્મવિવર્જિતા ।
ચારુરૂપા ચારુહાસા ચારુચન્દ્રકલાધરા ॥ ૨૪॥

ચરાચરજગન્નેત્રા ચક્રરાજનિકેતના ।
બ્રહ્માદિસૃષ્ટિકર્તી ચ ગોપ્ત્રી તેજસ્વરૂપિણી ॥ ૨૫॥

ભાનુમણ્ડલમધ્યસ્થા ભગવતીસદાશિવા ।
બ્રહ્માણ્ડકોટિજનની પુરુષાર્થપ્રદામ્બિકા ॥ ૨૬॥

આદિમધ્યાન્તરહિતા હરિબ્રહ્મેશ્વરાર્ચિતા ।
નારાયણી નાદરૂપા સમ્પૂર્ણા ભુવનેશ્વરી ॥ ૨૭॥

રાજરાજાર્ચિતા રમ્યા રઞ્જની મુનિરઞ્જની ।
કલ્યાણી લોકવરદા કરુણારસમઞ્જુલા ॥ ૨૮॥

વરદા વામનયના મહારાજ્ઞી નિરીશ્વરી ।
રક્ષાકરી રાક્ષસઘ્ની દુષ્ટરાજમદાપહા ॥ ૨૯॥

વિધાત્રી વેદજનની રાકા ચન્દ્રસમાનના ।
તન્ત્રરૂપા તન્ત્રિણી ચ તન્ત્રવેદ્યા તપસ્વિની ॥ ૩૦॥

શાસ્ત્રરૂપા શાસ્ત્રાધારા સર્વશાસ્ત્રસ્વરૂપિણી ।
રાગપાશા મનશ્શ્યાભા પઞ્ચભૂતમયી તથા ॥ ૩૧॥

પઞ્ચતન્માત્રસાયકા ક્રોધાકારાઙ્કુશાઞ્ચિતા ।
નિજકાન્તિપરાજણ્ડા મણ્ડલા ભાનુમણ્ડલા ॥ ૩૨॥

કદમ્બમયતાટઙ્કા ચામ્પેયકુસુમપ્રિયા ।
સર્વવિદ્યાઙ્કુરાકારા દન્તપઙ્ક્તિદ્વયાઞ્ચિતા ॥ ૩૩॥

સરસાલાપમાધુરી જિતવાણી વિપઞ્ચિકા ।
ગ્રૈવેયમણિભૂષિતા કૂર્મપૃષ્ઠપદદ્વયા ॥ ૩૪॥

નખકાન્તિપરિચ્છિન્ના કામિની કામરૂપિણી ।
મણિકિઙ્કિણિકા દિવ્યરચના દામભૂષિતા ॥ ૩૫॥

રમ્ભા સ્તમ્ભમનોજ્ઞા ચ માર્દવોરુદ્વયાન્વિતા ।
પદશોભાજિતામ્બોજા મહાગિરિપુરીશ્વરી ॥ ૩૬॥

દેવરત્નગૃહાન્તસ્થા સર્વજ્ઞા જ્ઞાનમોચના ।
મહાપદ્માસનસ્થા ચ કદમ્બવનવાસિની ॥ ૩૭॥

નિજાંશભોગસરોલ્લસિતલક્ષ્મીગૌરીસરસ્વતી ।
મઞ્જુકુઞ્જન્મણિમઞ્જીરાઽલઙ્કૃતપદામ્ભુજા ॥ ૩૮॥

હંસિકા મન્દગમના મહાસૌન્દર્યવારદી ।
અનવદ્યાઽરુણા ગણ્યાઽગણ્યા દુર્ગુણદૂરકા ॥ ૩૯॥

સમ્પત્દાત્રી સૌખ્યદાત્રી કરુણામયસુન્દરી ।
અશ્વિનિદેવસન્તુષ્ટા સર્વદેવસુસેવિતા ॥ ૪૦॥

ગેયચક્રરથારૂઢા મન્ત્રિણ્યમ્બાસમર્ચિતા ।
કામદાઽનવદ્યાઙ્ગી દેવર્ષિસ્તુતવૈભવા ॥ ૪૧॥

વિઘ્નયન્ત્રસમોભેદા કરોત્યન્નૈકમાધવા ।
સઙ્કલ્પમાત્રનિર્ધૂતા વિષ્ણુવર્દનમર્દિની ॥ ૪૨॥

મૂર્તિત્રયસદાસેવા સમયસ્થા નિરામયા ।
મૂલાધારા ભવાઽપારા બ્રહ્મગ્રન્થિવિભેદિની ॥ ૪૩॥

મણિપૂરાન્તરા વાસા વિષ્ણુ ગ્રન્થિવિભેદિની ।
આજ્ઞાચક્રગદામાયા રુદ્રગ્રન્થિવિભેદિની ॥ ૪૪॥

સહસ્રારસમારૂઢા સુધાસારાભિવર્ષિણી ।
તટિન્નેખા સમાપાસા ષટ્ચક્રોપરિવાસિની ॥ ૪૫॥

ભક્તિવશ્યા ભક્તિગમ્યા ભક્તરક્ષણકારિણી ।
ભક્તિપ્રિયા ભદ્રમૂર્તિઃ ભક્તસન્તોષદાયિની ॥ ૪૬॥

સર્વદા કુણ્ડલિની અમ્બા શારદા શર્મદા શુભા ।
સાધ્વી શ્રીકર્યુદારા ચ ધીકરી શમ્ભુમાનિતા ॥ ૪૭॥

શમ્ભુ માનસિકામાતા શરચ્ચન્દ્રમુખી તથા ।
શિષ્ટા શિવા નિરાકારા નિર્ગુણામ્બા નિરાકુલા ॥ ૪૮॥

નિર્લેપા નિસ્તુલાકન્યા નિરવદ્યા નિરન્તરા ।
નિષ્કારણા નિષ્કલઙ્કા નિત્યબુદ્ધા નિરીશ્વરા ॥ ૪૯॥

નીરાગા રાગમથની નિર્મદા મદનાશિની ।
નિર્મમા સમમાયા ચ અનન્યા જગદીશ્વરી ॥ ૫૦॥

નિરોગા નિરાબાધા ચ નિજાનન્દા નિરાશ્રયા ।
નિત્યમુક્તા નિગમમા નિત્યશુદ્ધા નિરુત્તમા ॥ ૫૧॥

નિર્વ્યાધા વ્યાધિમથના નિષ્ક્રિયા નિરુપપ્લવા ।
નિશ્ચિન્તા નિરહઙ્કારા નિર્મોહા મોહનાશિની ॥ ૫૨॥

નિર્બાધા મમતાહન્ત્રી નિષ્પાપા પાપનાશિની ।
અભેદા સાક્ષિરૂપા ચ નિર્ભેદા ભેદનાશિની ॥ ૫૩॥

નિર્નાશા નાશમથની પુષ્કલા લોભહારિણી ।
નીલવેણી નિરાલમ્બા નિરપાયા ભયાપહા ॥ ૫૪॥

નિસ્સન્દેહા સંશયઘ્ની નિર્ભવા ચ નિરઞ્જિતા ।
સુખપ્રદા દુષ્ટદૂરા નિર્વિકલ્પા નિરત્યયા ॥ ૫૫॥

સર્વજ્ઞાના દુઃખહન્ત્રી સમાનાધિકવર્જિતા ।
સર્વશક્તિમયી સર્વમઙ્ગલા સત્ગતિપ્રદા ॥ ૫૬॥

સર્વેશ્વરી સર્વમયી સર્વતત્ત્વસ્વરૂપિણી ।
મહામાયા મહાશક્તિઃ મહાસત્વા મહાબલા ॥ ૫૭॥

મહાવીર્યા મહાબુદ્ધિઃ મહૈશ્વર્યા મહાગતિઃ ।
મનોન્મણી મહાદેવી મહાપાતકનાશિની ॥ ૫૮॥

મહાપૂજ્યા મહાસિદ્ધિઃ મહાયોગીશ્વરેશ્વરી ।

મહાતન્ત્રા મહામન્ત્રા મહાયન્ત્રા મહાસના ॥ ૫૯॥

મહાયાગક્રમારાધ્યા મહાયોગસમર્ચિતા ।
પ્રકૃતિર્વિકૃતિર્વિદ્યા સર્વભૂતહિતપ્રદા ॥ ૬૦॥

શુચિસ્વાહા હિરણ્મયી ધન્યા સુતા સ્વધા તથા ।
માન્યા શ્રદ્ધા વિભૂદિતા બ્રહ્મવિષ્ણુશિવાત્મિકા ॥ ૬૧॥

દીપ્તા કાન્તા ચ કામાક્ષી ભાવિતાઽનુગ્રહપ્રદા ।
શિવપ્રિયા રમાઽનઘા અમૃતાઽઽનન્દરૂપિણી ॥ ૬૨॥

લોકદુઃખવિનાશિની કરુણા ધર્મવર્ધિની ।
પદ્મિની પદ્મગન્ધિની સુપ્રસન્ના સુનન્દિની ॥ ૬૩॥

પદ્માક્ષી પુણ્યગન્ધા ચ પ્રસાદાભિમુખીપ્રભા ।
આહ્લાદજનની પુષ્ટા લોકમાતેન્દુશીતલા ॥ ૬૪॥

પદ્મમાલાધરાઽત્ભુતા અર્ધચન્દ્રવિભૂષિણી ।
આર્યવૈશ્યસહોદરી વૈશ્યસૌખ્યપ્રદાયિની ॥ ૬૫॥

તુષ્ટિઃ પુષ્ટિશ્શિવારૂઢા દારિદ્ર્યવિનાશિની ।
શિવધાત્રી ચ વિમલાસ્વામિની પ્રીતિપુષ્કલા ॥ ૬૬॥

આર્યા શ્યામા સતી સૌમ્યા શ્રીદા મઙ્ગલદાયિની ।
ભક્તકોટિપરાનન્દા સિદ્ધિરૂપા વસુપ્રદા ॥ ૬૭॥

ભાસ્કરી જ્ઞાનનિલયા લલિતાઙ્ગી યશસ્વિની ।
ઊર્જિતા ચ ત્રિકાલજ્ઞા સર્વકાલસ્વરૂપિણી ॥ ૬૮॥

દારિદ્ર્યનાશિની ચૈવ સર્વોપદ્રવહારિણી ।
અન્નદા ચાન્નદાત્રી ચ અચ્યુદાનન્દકારિણી ॥ ૬૯॥

અનન્તા અચ્યુતા વ્યક્તા વ્યક્તાવ્યક્તસ્વરૂપિણી ।
શારદમ્બોજભદ્રાક્ષી અજયા ભક્તવત્સલા ॥ ૭૦॥

આશા ચાશ્રિતા રમ્યા ચ અવકાશસ્વરૂપિણી ।
આકાશમયપદ્મસ્થા અનાદ્યા ચ દ્વયોનિજા ॥ ૭૧॥

અબલા ચાગજા ચૈવ આત્મજા ચાત્મગોચરા ।
અનાદ્યા ચાદિદેવી ચ આદિત્યદયભાસ્વરા ॥ ૭૨॥

કાર્તેશ્વરમનોજ્ઞા ચ કાલકણ્ઠનિભસ્વરા ।
આધારા ચાત્મદયિતા અનીશા ચાત્મરૂપિણી ॥ ૭૩॥

ઈશિકા ઈશા ઈશાની ઈશ્વરૈશ્વર્યદાયિની ।
ઇન્દુસુતા ઇન્દુમાતા ઇન્દ્રિયા ઇન્દુમન્દિરા ॥ ૭૪॥

ઇન્દુબિમ્બસમાનાસ્યા ઇન્દ્રિયાણાં વશઙ્કરી ।
એકા ચૈવ એકવીરા એકાકારૈકવૈભવા ॥ ૭૫॥

લોકત્રયસુસમ્પૂજ્યા લોકત્રયપ્રસૂતિતા ।
લોકમાતા જગન્માતા કન્યકા પરમેશ્વરી ॥ ૭૬॥

વર્ણાત્મા વર્ણનિલયા ષોડષાક્ષરરૂપિણી ।
કાલી કૃત્યા મહારાત્રી મોહરાત્રી સુલોચના ॥ ૭૭॥

કમનીયા કલાધારા કામિની વર્ણમાલિની ।
કાશ્મીરદ્રવલિપ્તાઙ્ગી કામ્યા ચ કમલાર્ચિતા ॥ ૭૮॥

માણિક્યભાસાલઙ્કારા કનકા કનકપ્રદા ।
કમ્બુગ્રીવા કૃપાયુક્તા કિશોરી ચ લલાટિની ॥ ૭૯॥

કાલસ્થા ચ નિમેષા ચ કાલદાત્રી કલાવતી ।
કાલજ્ઞા કાલમાતા ચ કન્યકા ક્લેશનાશિની ॥ ૮૦॥

કાલનેત્રા કલાવાણી કાલદા કાલવિગ્રહા ।
કીર્તિવર્ધિની કીર્તિજ્ઞા કીર્તિસ્થા કીર્તિદાયિની ॥ ૮૧॥

સુકીર્તિતા ગુણાતીતા કેશવાનન્દકારિણી ।
કુમારી કુમુદાબા ચ કર્મદા કર્મભઞ્જની ॥ ૮૨॥

કૌમુદી કુમુદાનન્દા કાલાઙ્ગી કાલભૂષણા ।
કપર્દિની કોમલાઙ્ગી કૃપાસિન્ધુઃ કૃપામયી ॥ ૮૩॥

કઞ્ચસ્થા કઞ્ચવદના કૂટસ્થા કુલરૂપિણી ।
લોકેશ્વરી જગદ્ધાત્રી કુશલા કુલસમ્ભવા ॥ ૮૪॥

ચિતજ્ઞા ચિન્તિતપદા ચિન્તસ્થા ચિત્સ્વરૂપિણી ।
ચમ્પકાપમનોજ્ઞા ચ ચારુ ચમ્પકમાલિની ॥ ૮૫॥

ચણ્ડસ્વરૂપિણી ચણ્ડી ચૈતન્યઘનકેહિની ।
ચિતાનન્દા ચિતાધારા ચિતાકારા ચિતાલયા ॥ ૮૬॥

ચબલાપાઙ્ગલતિકા ચન્દ્રકોટિસુભાસ્વરા ।
ચિન્તામણિગુણાધારા ચિન્તામણિવિભૂષિતા ॥ ૮૭॥

ભક્તચિન્તામણિલતા ચિન્તામણિસુમન્દિરા ।
ચારુચન્દનલિપ્તાઙ્ગી ચતુરા ચતુરાનના ॥ ૮૮॥

છત્રદા છત્રદારી ચ ચારુચામરવીજિતા ।
ભક્તાનાં છત્રરૂપા ચ છત્રછાયા કૃતાલયા ॥ ૮૯॥

જગજ્જીવા જગદ્ધાત્રી જગદાનન્દકારિણી ।
યજ્ઞરતા ચ જનની જપયજ્ઞપરાયણા ॥ ૯૦॥

યજ્ઞદા યજ્ઞફલદા યજ્ઞસ્થાનકૃતાલયા ।
યજ્ઞભોક્ત્રી યજ્ઞરૂપા યજ્ઞવિઘ્નવિનાશિની ॥ ૯૧॥

કર્મયોગા કર્મરૂપા કર્મવિઘ્નવિનાશિની ।
કર્મદા કર્મફલદા કર્મસ્થાનકૃતાલયા ॥ ૯૨॥

અકાલુષ્યસુચારિત્રા સર્વકર્મસમઞ્ચિતા ।
જયસ્થા જયદા જૈત્રી જીવિતા જયકારિણી ॥ ૯૩॥

યશોદા યશસામ્રાજ્યા યશોદાનન્દકારિણી ।
જ્વલિની જ્વાલિની જ્વાલા જ્વલદ્પાવકસન્નિભા ॥ ૯૪॥

જ્વાલામુખી જનાનન્દા જમ્બૂદ્વીપકૃતાલયા ।
જન્મદા ચ જન્મહતા જન્મની જન્મરઞ્જની ॥ ૯૫॥

જનની જન્મભૂઃ ચૈવ વેદશાસ્ત્રપ્રદર્શિની ।
જગદમ્બા જનિત્રી ચ જીવકારુણ્યકારિણી ॥ ૯૬॥

જ્ઞાતિદા જાતિદા જાતિજ્ઞાનદા જ્ઞાનગોચરા ।
જ્ઞાનમયી જ્ઞાનરૂપા ઈશ્વરી જ્ઞાનવિગ્રહા ॥ ૯૭॥

જ્ઞાનવિજ્ઞાનશાલિની જપાપુષ્પસમષ્ટિતા ।
જિનજૈત્રી જિનાધારા જપાકુસુમશોભિતા ॥ ૯૮॥

તીર્થઙ્કરી નિરાધારા જિનમાતા જિનેશ્વરી ।
અમલામ્બરધારિણી ચ વિષ્ણુવર્દનમર્દિની ॥ ૯૯॥

શમ્ભુકોટિદુરાધર્ષા સમુદ્રકોટિગમ્ભીરા ।

સૂર્યકોટિપ્રતીકાશા વાયુકોટિમહાબલા ॥ ૧૦૦॥

યમકોટિપરાક્રમા કામકોટિફલપ્રદા ।
રતિકોટિસુલાવણ્યા ચક્રકોટિસુરાજ્યદા ॥ ૧૦૧॥

પૃથ્વિકોટિક્ષમાધારા પદ્મકોટિનિભાનના ।
અગ્નિકોટિભયઙ્કરી શ્રીકન્યકાપરમેશ્વરી ॥ ૧૦૨॥

ઈશાનાદિકચિચ્છક્તિઃ ધનાધારા ધનપ્રદા ।
અણિમા મહિમા પ્રાપ્તિઃ કરિમા લઘિમા તથા ॥ ૧૦૩॥

પ્રાકામ્યા વશિત્વા ચૈવ ઈશિત્વા સિદ્ધિદાયિની ।
મહિમાદિગુણૈર્યુક્તા અણિમાદ્યષ્ટસિદ્ધિદા ॥ ૧૦૪॥

યવનાઙ્ગી જનાદીના અજરા ચ જરાવહા ।
તારિણી ત્રિગુણા તારા તારિકા તુલસીનતા ॥ ૧૦૫॥

ત્રયીવિદ્યા ત્રયીમૂર્તિઃ ત્રયજ્ઞા તુરીયા તથા ।
ત્રિગુણેશ્વરી ત્રિવિદા વિશ્વમાતા ત્રપાવતી ॥ ૧૦૬॥

તત્ત્વજ્ઞા ત્રિદશારાદ્યા ત્રિમૂર્તિજનની તથા ।
ત્વરા ત્રિવર્ણા ત્રૈલોક્યા ત્રિદિવા લોકપાવની ॥ ૧૦૭॥

ત્રિમૂર્તી ત્રિજનની ચૈવ ત્રિભૂઃ તારા તપસ્વિની ।
તરુણી તાપસારાધ્યા તપોનિષ્ટા તમોપહા ॥ ૧૦૮॥

તરુણા ત્રિદિવેશાના તપ્તકાઞ્ચનસન્નિભા ।
તાપસી તારારૂપિણી તરુણાર્કપ્રદાયિની ॥ ૧૦૯॥

તાપઘ્ની તર્કિકા તર્કવિદ્યાऽવિદ્યાસ્વરૂપિણી ।
ત્રિપુષ્કરા ત્રિકાલજ્ઞા ત્રૈલોક્યવ્યાપિનીશ્વરી ॥ ૧૧૦॥

તાપત્રયવિનાશિની તપસ્સિદ્ધિપ્રદાયિની ।
ગુણારાધ્યા ગુણાતીતા કુલીના કુલનન્દિની ॥ ૧૧૧॥

તીર્થરૂપા તીર્થકરી શોકદુઃખવિનાશિની ।
અદીના દીનવત્સલા દીનાનાથપ્રિયઙ્કરી ॥ ૧૧૨॥

દયાત્મિકા દયાપૂર્ણા દેવદાનવપૂજિતા ।
દક્ષિણા દક્ષિણારાધ્યા દેવાનાં મોદકારિણી ॥ ૧૧૩॥

દાક્ષાયણી દેવસુતા દુર્ગા દુર્ગતિનાશિની ।
ઘોરાગ્નિદાહદમની દુઃખદુઃસ્વપ્નવારિણી ॥ ૧૧૪॥

શ્રીમતિઃ શ્રીમયી શ્રેષ્ઠા શ્રીકરી શ્રીવિભાવરી ।
શ્રીદા શ્રીશા શ્રીનિવાસા પરમાનન્દદાયિની ॥ ૧૧૫॥

શ્રીયુતા શ્રીમતિઃ માતાધનદા દામિની દયા ।
દાન્તા ધર્મદા શાન્તા ચ દાડિમીકુસુમપ્રભા ॥ ૧૧૬॥

ધરણી ધારણી ધૈર્યા ધૈર્યદા ધનશાલિની ।
ધનઞ્જયા ધનાકારા ધર્મા ધાત્રી ચ ધર્મિણી ॥ ૧૧૭॥

દેદીપ્યમાના ધર્મિણી દુરાવારા દુરાસદા ।
નાનારત્નવિચિત્રાઙ્ગી નાનાભરણમણ્ડિતા ॥ ૧૧૮॥

નીરજાસ્યા નિરાતઙ્ગા નવલાવણ્યસુન્દરી ।
દમના નિધિતા નિત્યા નિજા નિર્ણયસુન્દરી ॥ ૧૧૯॥

પરમા ચ નિર્વિકારા નિર્વૈરા નિખિલા તથા ।
પ્રમદા પ્રથમા પ્રાજ્ઞા સર્વપાવનપાવની ॥ ૧૨૦॥

સર્વપ્રિયા સર્વવ્રતા પાવના પાપનાશિની ।
વાસવ્યંશભાગાઽપૂર્વા પરઞ્જ્યોતિસ્વરૂપિણી ॥ ૧૨૧॥

પરોક્ષા પારગા કન્યા પરિશુદ્ધાઽપારગા ।
પરાસિદ્ધિઃ પરાગતિઃ પશુપાશવિમોચની ॥ ૧૨૨॥

પદ્મગન્ધા ચ પદ્માક્ષી પરબ્રહ્મસ્વરૂપિણી ।
પદ્મકેસરમન્દિરા પરબ્રહ્મનિવાસિની ॥ ૧૨૩॥

પરમાનન્દમુદિતા પૂર્ણપીઠનિવાસિની ।
પરમેશી પૃથ્વી ચૈવ પરચક્રનિવાસિની ॥ ૧૨૪॥

પરાવરા પરાવિદ્યા પરમાનન્દદાયિની ।
વાગ્રૂપા વાગ્મયી વાગ્દા વાગ્નેત્રી વાગ્વિશારદા ॥ ૧૨૫॥

ધીરૂપા ધીમયી ધીરા ધીદાત્રી ધીવિશારદા ।
વૃન્દારકવૃન્દવન્દ્યા વૈશ્યવૃન્દસહોદરી ॥ ૧૨૬॥

રાજરાજેશ્વરાર્ચિતા ભક્તસર્વાર્થસાધકા ।
પણિભૂષા બાલાપૂજા પ્રાણરૂપા પ્રિયંવદા ॥ ૧૨૭॥

ભક્તિપ્રિયા ભવારાધ્યા ભવેશી ભયનાશિની ।
ભવેશ્વરી ભદ્રમુખી ભવમાતા ભવા તથા ॥ ૧૨૮॥

ભટ્ટારિકા ભવાગમ્યા ભવકણ્ટકનાશિની ।
ભવાનન્દા ભાવનીયા ભૂતપઞ્ચકવાસિની ॥ ૧૨૯॥

ભગવતી ચ ભૂદાત્રી ભૂતેશી ભૂતરૂપિણી ।
ભૂતસ્થા ભૂતમાતા ચ ભૂતજ્ઞા ભવમોચની ॥ ૧૩૦॥

ભક્તશોકતમોહન્ત્રી ભવભારવિનાશિની ।
ભૂગોપચારકુશલા દાત્રી ચ ભૂચરી તથા ॥ ૧૩૧॥

ભીતિહા ભક્તિરમ્યા ચ ભક્તાનામિષ્ટદાયિની ।
ભક્તાનુકમ્પિની ભીમા ભક્તાનામાર્તિનાશિની ॥ ૧૩૨॥

ભાસ્વરા ભાસ્વતી ભીતિઃ ભાસ્વદુત્થાનશાલિની ।
ભૂતિદા ભૂતિરૂપા ચ ભૂતિકા ભુવનેશ્વરી ॥ ૧૩૩॥

મહાજિહ્વા મહાદંષ્ટ્રા મણિપૂરનિવાસિની ।
માનસી માનદા માન્યા મનઃચક્ષુરગોચરા ॥ ૧૩૪॥

મહાકુણ્ડલિનીમાતા મહાશત્રુવિનાશિની ।
મહામોહાન્તકારજ્ઞા મહામોક્ષપ્રદાયિની ॥ ૧૩૫॥

મહાશક્તિઃ મહાવિર્યા મહિષાસુરમર્દિની ।
મધુરા ચ મેધા મેધ્યા મહાવૈભવવર્ધિની ॥ ૧૩૬॥

મહાવ્રતા મહામૂર્તા મુક્તિકામ્યાર્થસિદ્ધિદા ।
મહનીયા માનનીયા મહાદુઃખવિનાશિની ॥ ૧૩૭॥

મુક્તાહારાલતોભેતા મત્તમાતઙ્ગકામિની ।
મહાઘોરા મન્ત્રમાતા મહાચોરભયાપહા ॥ ૧૩૮॥

માલિની ચ મહાસૂક્ષ્મા મકરાકૃતિકુણ્ડલા ।
મહાપ્રભા મહાચિન્ત્યા મહામન્ત્રમહૌષધિઃ ॥ ૧૩૯॥

મણિમણ્ડલમધ્યસ્થા મણિમાલાવિરાજિતા ।
મનોરમા મહારૂપા રાજ્ઞી રાજીવલોચના ॥ ૧૪૦॥

વિદ્યાર્થિની રમામાતા વિષ્ણુરૂપાવિનોદિની ।

વીરેશ્વરી ચ વરદા વિશાલનયનોત્પલા ॥ ૧૪૧॥

વીરસુતા વીરવન્દ્યા વિશ્વભૂઃ વીરનન્દિની ।
વિશ્વેશ્વરી વિશાલાક્ષી વિષ્ણુમાયાવિમોહિની ॥ ૧૪૨॥

વિખ્યાતા વિલસત્કચા બ્રહ્મેશી બ્રહ્મરૂપિણી ।
બ્રહ્મવિદ્યા ચ બ્રહ્માણી વિશ્વા ચ વિશ્વરૂપિણી ॥ ૧૪૩॥

વિશ્વવન્દ્યા વિશ્વશક્તિઃ વીરા વિચક્ષણા તથા ।
બાલા બાલિકા બિન્દુસ્થા વિશ્વપાશવિમોચની ॥ ૧૪૪॥

શિશુપ્રાયા વૈદ્યવિદ્યા શીલાશીલપ્રદાયિની ।
ક્ષેત્રા ક્ષેમઙ્કરી વૈશ્યા આર્યવૈશ્યકુલેશ્વરી ॥ ૧૪૫॥

કુસુમશ્રેષ્ઠિસત્પુત્રી કુસુમામ્બાકુમારિકા ।
બાલનગરસમ્પૂજ્યા વિરૂપાક્ષસહોદરી ॥ ૧૪૬॥

સર્વસિદ્ધેશ્વરારાધ્યા સર્વાભીષ્ટફલપ્રદા ।
સર્વદુઃખપ્રશમની સર્વરક્ષાસ્વરૂપિણી ॥ ૧૪૭॥

વિભુદા વિષ્ણુસઙ્કલ્પા વિજ્ઞાનઘનરૂપિણી ।
વિચિત્રિણી વિષ્ણુપૂજ્યા વિષ્ણુમાયાવિલાસિની ॥ ૧૪૮॥

વૈશ્યદાત્રી વૈશ્યગોત્રા વૈશ્યગોત્રવિવર્ધિની ।
વૈશ્યભોજનસન્તુષ્ટા મહાસઙ્કલ્પરૂપિણી ॥ ૧૪૯॥

સન્ધ્યા વિનોદિનીવેદ્યા સત્યજ્ઞાનપ્રબોધિની ।
વિકારરહિતામાતા વિજયા વિશ્વસાક્ષિણી ॥ ૧૫૦॥

તત્ત્વજ્ઞા ચ તત્ત્વાકારા તત્ત્વમર્થસ્વરૂપિણી ।
તપસ્વાધ્યાયનિરતા તપસ્વીજનસન્નુતા ॥ ૧૫૧॥

વિપુલા વિન્ધ્યવાસિની નગરેશ્વરમાનિતા ।
કમલાદેવિસમ્પૂજ્યા જનાર્દનસુપૂજિતા ॥ ૧૫૨॥

વન્દિતા વરરૂપા ચ મતિતા મત્તકાશિની ।
માધવી માલિની માન્યા મહાપાતકનાશિની ॥ ૧૫૩॥

વરા ચ વરવર્ણિની વારિતાકારવર્ષિણી ।
સત્કીર્તિગુણસમ્પન્ના વૈશ્યલોકવશઙ્કરી ॥ ૧૫૪॥

તત્ત્વાસના તપોફલા તરુણાદિત્યપાટલા ।
તન્ત્રસારા તન્ત્રમાતા તપોલોકનિવાસિની ॥ ૧૫૫॥

તન્ત્રસ્થા તન્ત્રસાક્ષિણી તન્ત્રમાર્ગપ્રદર્શિની ।
સર્વસમ્પત્તિજનની સત્પથા સકલેષ્ટદા ॥ ૧૫૬॥

અસમાના સામદેવી સમર્હા સકલસ્તુતા ।
સનકાદિમુનિધ્યેયા સર્વશાસ્ત્રાર્થગોચરા ॥ ૧૫૭॥

સદાશિવા સમુત્તીર્ણા સાત્વિકા શાન્તરૂપિણી ।
સર્વવેદાન્તનિલયા સમયા સર્વતોમુખી ॥ ૧૫૮॥

સહસ્રદલપદ્મસ્થા સર્વચૈતન્યરૂપિણી ।
સર્વદોષવિનિર્મુક્તા સચ્ચિદાનન્દરૂપિણી ॥ ૧૫૯॥

સર્વવિશ્વમ્ભરાવેદ્યા સર્વજ્ઞાનવિશારદા ।
વિદ્યાવિદ્યાકરી વિદ્યા વિદ્યાવિદ્યપ્રબોધિની ॥ ૧૬૦॥

વિમલા વિભવા વેદ્યા વિશ્વસ્થા વિવિતોજ્વલા ।
વીરહત્યપ્રશમની વિનમ્રજનપાલિની ॥ ૧૬૧॥

વીરમધ્યા વિરાટ્રૂપા વિતન્ત્રા વિશ્વનાયિકા ।
વિશ્વમ્બરા સમારાધ્યા વિક્રમા વિશ્વમઙ્ગલા ॥ ૧૬૨॥

વિનાયકી ચ વાસવી કન્યકા પરમેશ્વરી ।
નિત્યકર્મફલપ્રદા નિત્યમઙ્ગલરૂપિણી ॥ ૧૬૩॥

ક્ષેત્રપાલસમર્ચિતા ગ્રહપીડાનિવારિણી ।
ક્ષેમકારુણ્યકારિણી રુદ્રલક્ષણધારિણી ॥ ૧૬૪॥

સર્વાનન્દમયી ભદ્રા વૈશ્યસૌખ્યપ્રદાયિની ।
નિત્યાનન્દસ્વરૂપિણી વૈશ્યસમ્પત્પ્રદાયિની ॥ ૧૬૫॥

ક્ષેત્રજ્યેષ્ઠાચલસ્થિતા શ્રીમન્ત્રપુરવાસિની ।
સૌમઙ્ગલ્યાદિદેવતા શ્રીકન્યકાપરમેશ્વરી ॥ ૧૬૬॥

ફલશ્રુતિઃ ।
સહસ્રનામકં સ્તોત્રં વાસવ્યાઃ યઃ પઠેન્નરઃ ।
પુત્રપૌત્રમવાપ્નોતિ સર્વસિદ્ધિઞ્ચવિન્દતિ ॥ ૧॥

સર્વરોગપ્રશમનં દીર્ઘાયુષ્યપ્રદાયકમ્ ।

અનેન સદૃશં સ્તોત્રં ન ભૂતં ન ભવિષ્યતિ ॥ ૨॥

યં યં કામયતે કામં તં તં પ્રાપ્નોતિ નિશ્ચિતમ્ ।
તસ્યૈવ ભવતિ શ્રદ્ધા કન્યકા નામકીર્તને ॥ ૩॥

॥ ઇતિ શ્રીવાસવીકન્યકાપરમેશ્વરી સહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

સમર્પણમ્ ।
યદક્ષરપદભ્રષ્ટં માત્રાહીનં તુ યદ્ભવેત્ ।
તત્સર્વં ક્ષમ્યતાં દેવી વાસવામ્બા નમોઽસ્તુતે ॥ ૧॥

વિસર્ગબિન્દુમાત્રાણિ પદપાદાક્ષરાણિ ચ ।
ન્યૂનાનિ ચાતિરિક્તાનિ ક્ષમસ્વ પરમેશ્વરી ॥ ૨॥

અન્યથા શરણં નાસ્તિ ત્વમેવ શરણં મમ ।
તસ્માત્કારુણ્યભાવેન રક્ષ રક્ષ મહેશ્વરી ॥ ૩॥

Composed and proofread by Bala Umamaheshwari

*Shri Vasavi Kanyaka Parameshwari Sahasranama Stotram*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*